गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।इन्द्रः। जगती, १३ त्रिष्टुप्

**ऋ॒तुर्जनि॑त्री॒ तस्या॑ अ॒पस्परि॑ म॒क्षू जा॒त आवि॑श॒द्यासु॒ वर्ध॑ते।**

**तदा॑ह॒ना अ॑भवत्पि॒प्युषी॒ पयो॒ऽशोः पी॒यूषं॑ प्रथ॒मं तदु॒क्थ्य॑म्॥ २.०१३.०१**

ऋतुः- कालदेवता। जनित्री- माता। तस्याः परि- तस्या जनन्याः सकाशात्। जातः- उद्भूतो रसः। मक्षु- क्षिप्रम्। अपः- जीवोदकानि। आविशत्। यासु- अप्सु मूलशक्तिधारासु। वर्धते। तदाहनाः- तस्माज्जीवोदकान्निष्पादितव्यः। पयः- रसस्य। पिप्युषी- वर्धकः। अभवत्। तत्। अंशोः पीयूषम्- निष्पन्नो रसः। प्रथमम्- मुख्यः। उक्थ्यम्- मन्त्रप्रोक्तो भवति ॥१॥

**स॒ध्रीमा य॑न्ति॒ परि॒ बिभ्र॑ती॒ः पयो॑ वि॒श्वप्स्न्या॑य॒ प्र भ॑रन्त॒ भोज॑नम्।**

**स॒मा॒नो अध्वा॑ प्र॒वता॑मनु॒ष्यदे॒ यस्ताकृ॑णोः प्रथ॒मं सास्यु॒क्थ्य॑ः॥ २.०१३.०२**

सध्री- सध्रीचीना आपः। पयः- रसम्। परि- परितः। बिभ्रतीः- बिभ्राणाः। यन्ति- सरन्ति। विश्वप्स्न्याय- विश्वासामपां शरणाय समुद्राय हृदयसमुद्रायेत्याध्यात्मिके। श्रुतौ हृदयं समुद्रः। समुद्रे हृदीत्यादिश्रुतिषु यथा। भोजनम्- भोगम्। प्र भरन्त- प्रकर्षेण भरन्ति। प्रवताम्- प्रवणवताम्। अनुस्यदे- स्यन्दने। अध्वा- मार्गः। समानः- एकः। यः। ता- एतानि। अकृणोः- अकरोः। प्रथमम्- मुख्यतया। सः। असि- भवसि। उक्थ्यः- मन्त्रप्रधानः ॥२॥

**अन्वेको॑ वद॒ति यद्ददा॑ति॒ तद्रू॒पा मि॒नन्तद॑पा॒ एक॑ ईयते।**

**विश्वा॒ एक॑स्य वि॒नुद॑स्तितिक्षते॒ यस्ताकृ॑णोः प्रथ॒मं सास्यु॒क्थ्य॑ः॥ २.०१३.०३**

यत्। ददाति- प्रयच्छति। तत्। एकः- एकः सन्नेव। अनु वदति। एकः- एकः सन्नेव। रूपा तदपः- मूलशक्तिधाराः। मिनन्- उपासनार्थं तापयन्। ईयते- गच्छति। तासां तापं विना

Dr. Rangaji

WEBOLIM

नाध्यात्मवृद्धिः स्यात्। एकस्य- एकस्यैव। विश्वा- सर्वान्। विनुदः- तापान्। तितिक्षते- उपासकोऽध्यात्मवृद्ध्यर्थं सहते। यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥३॥

**प्रजाभ्यः पुष्टिं विभजन्त आसते रयिमिव पृष्ठं प्रभवन्तमायते।**
**असिन्वन्दंष्ट्रैः पितुरत्ति भोजनं यस्ताकृणोः प्रथमं सास्युक्थ्यः॥ २.०१३.०४**

आयते- आगच्छते अतिथये। पृष्ठम्- तदर्थितम्। प्रभवन्तम्- धारकम्। रयिमिव- दानयोग्यधनमिव। प्रजाभ्यः- स्वसन्ततिभ्यः। पुष्टिम्- भवद्दत्तं पुष्टिकरं धनम्। विभजन्तः। आसते- भवन्ति। असिन्वन्- बध्नन् सेतुबन्धादिकं कुर्वन्। पितुर्भोजनम्- इन्द्रदत्तं भोगम् वृष्ट्यादिकम्। दंष्ट्रैः अत्ति- लोको भक्षयति। यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥४॥

**अधाकृणोः पृथिवीं संदृशे दिवे यो धौतीनामहिहन्नारिणक्पथः।**
**तं त्वा स्तोमेभिरुदभिर्न वाजिनं देवं देवा अजनन्सास्युक्थ्यः॥ २.०१३.०५**

अध- अथ। दिवे- नभसे। संदृशे- सम्यक् दर्शनाय। पृथिवीम्- भूमिम्। अकृणोः- अकरोः। यः। अहिहन्- वृत्रहन्। धौतीनाम्- चलन्तीनामपाम्। पथः- मार्गान्। अरिणक्- व्यरेचयत्। गन्तुं योग्यानकरोरिति सायणः। तम्- तादृशम्। त्वा- भवन्तम्। उदभिः- जीवोदकधाराभिः। वाजिनं न- प्राणमिव। स्तोमेभिः- मन्त्रैः। देवम्- द्योतनशीलम्। देवाः- द्योतनशक्तयः। अजनन्- अवर्धयन्। सासि- सोसि। उक्थ्यः- मन्त्रस्तुतः ॥५॥

**यो भोजनं च दयसे च वर्धनमार्द्रादा शुष्कं मधुमद्दुदोहिथ।**
**स शेवधिं नि दधिषे विवस्वति विश्वस्यैक ईशिषे सास्युक्थ्यः॥ २.०१३.०६**

यः- यस्त्वम्। भोजनम्- भोगम्। वर्धनम्- वर्धमानम्। दयसे- प्रयच्छसि। आर्द्रात्- मूलशक्तिधारात अपक्वादव्यक्तात्। शुष्कम्- पक्वं व्यक्तं जगत्। मधुमत्- मधुरं भोगमयम्। आ दुदोहिथ- दुग्धवानसि। यः। शेवधिम्- निधिम्। शेवं सुखं धीयतेस्मिन्निति शेवधिः। विवस्वति-

Dr. Rangaji
WEBOLIM

सेवके। नि दधिषे- निदधासि। एकः- एकः सन्। विश्वस्य- सर्वस्य। ईशिषे- स्वामित्त्वं वहसि। सास्युक्थ्यः ॥६ ॥

**यः पुष्पिणीश्च प्रस्वश्च धर्मणाधि दाने व्य१वनीरधारयः।**

**यश्चासमा अजनो दिद्युतो दिव उरुरूर्वाँ अभितः सास्युक्थ्यः॥ २.०१३.०७**

यः- यस्त्वम्। पुष्पिणीः- पुष्पयुक्ताः। च। प्रस्वः- प्रसूताः। च। अवनीः- रक्षन्तीरोषधीः। धर्मणा- स्वधर्मेण। दाने अधि- क्षेत्रे। वि- विशेषेण। अधारयः। यश्च। असमाः- अनुपमाः। दिद्युतः- द्योतनशक्तीः। अजनः- अजनयः। उरुः- विस्तृतः सन्। ऊर्वान्- विस्तृतान्। दिवः- नभसः। अभितः। अजनयः। सास्युक्थ्यः ॥७ ॥

**यो नार्मरं सहवसुं निहन्तवे पृक्षाय च दासवेशाय चावहः।**

**ऊर्जयन्त्या अपरिविष्टमास्यमुतैवाद्य पुरुकृत्सास्युक्थ्यः॥ २.०१३.०८**

यः- यस्त्वम्। सहवसुम्- सम्पदपहारकम्। नार्मरम्- नृमारकम्। निहन्तवे- हन्तुम्। पृक्षाय- हव्याहरणाय। च। दासवेशाय- विषयवासनादासभावनानाशनाय। च। ऊर्जयन्त्याः- बलवत्या हेत्याः। अपरिविष्टम्- मुक्तम्। आस्यम्। अवहः- अधारयः। उत। अद्यैव। पुरुकृत्- बहुकर्मकृत्। सास्युक्थ्यः ॥८ ॥

**शतं वा यस्य दश साकमाद्य एकस्य श्रुष्टौ यद्ध चोदमाविथ।**

**अरज्जौ दस्यून्समुनब्दभीतये सुप्राव्यो अभवः सास्युक्थ्यः॥ २.०१३.०९**

यस्य। एकस्य- असाधारणस्य। शतं दश- बहवो हरयः प्राणाः। साकम्- युगपत्। आ- आभिमुख्येन। श्रुष्टौ- सुखनिमित्ते। भवन्ति। चोदम्- चोदनम्। आविथ- ररक्षिथ। अरज्जौ- गवां चिद्रश्मीनां बन्धस्थानां विमोचने। दस्यून्- चोरभावनानि। समुनप्- नाशितवान्। दभीतये- प्रेरितगतये। दभ प्रेरणे। सुप्राव्यः- शोभनरक्षकः। अभवः। सास्युक्थ्यः ॥९॥

Dr. Rangaji

WEBOLIM

**विश्वेदनु रोधना अस्य पौंस्यं ददुरस्मै दधिरे कृत्नवे धनम्।**

**षळस्तभ्ना विष्टिरः पञ्च संदृशः परि परो अभवः सास्युक्थ्यः॥ २.०१३.१०**

विश्वा- सर्वाः। रोधनाः- आपो मूलशक्तिधाराः। अस्य- एतस्य। पौंस्यम्- पौरुषम्। अनु- अनुवर्तन्ते। अस्मै- एतस्मै। कृत्नवे- कर्त्रे। धनम्- सम्पदम्। ददुः- अयच्छन्। दधिरे- धृतवन्तः। विष्टिरः- विस्तीर्णः सन्। षट्- भूर्भुवरादिषड्भूमिकाः। अस्तभ्नाः- स्तम्भितवान्। पञ्च संदृशः- निषादपञ्चमजनेषु ये दर्शनवन्तस्तान्। परः- श्रेष्ठः सन्। परि अभवः- परितो भवसि ॥१० ॥

**सुप्रवाचनं तव वीर वीर्यं१ यदेकेन क्रतुना विन्दसे वसु।**

**जातूष्ठिरस्य प्र वयः सहस्वतो या चकर्थ सेन्द्र विश्वास्युक्थ्यः॥ २.०१३.११**

वीर। इन्द्र- परमेश्वर। तव- ते। वीर्यम्। सुप्रवचनम्- सुष्ठु प्रवचनीयम्। एकेन। क्रतुना- सङ्कल्पेन। वसु- चित्तवृत्तिस्तम्भम्। वसु स्तम्भे। विन्दसे- जानासि। जातूष्ठिरस्य- सर्वदा स्थिरस्य। सहस्वतः- सहनशीलस्य। वयः- हव्यं स्वीकृतवान्। या विश्वा- यानि कर्माणि। चकर्थ- अकरोस्तानि सफलानि। सः उक्थ्यः ॥११ ॥

**अरमयः सरपसस्तराय कं तुर्वीतये च वय्याय च स्रुतिम्।**

**नीचा सन्तमुदनयः परावृजं प्रान्धं श्रोणं श्रवयन्सास्युक्थ्यः॥ २.०१३.१२**

सरपसस्तराय- सरणशीलानामपां मूलशक्तिधाराणां तारणाय। कम्- सुखेन। तुर्वीतये- द्रुततरायोपासकाय। वय्याय- मुमुक्षुवे। वयः पक्षी मुमुक्षाप्रतीकः श्रुतौ। स्रुतिम्- सरणम्। अरमयः- लीलया कृतवान्। नीचा सन्तम्- अप्सु मूलशक्तिधारास्वन्तः सन्तम्। परावृजम्- पापानि वर्जयन्तम्। पापानि वृणक्तीति परावृक्। उदनयः- ऊर्ध्वं नीतवानसि। अन्धं श्रोणम्- दर्शनरहितं गतिरहितम्। श्रवयन्- स्ववीर्यं प्रख्यापयन्। उदनयः- दर्शनं गतिं दत्त्वा उद्धृतवान्। सास्युक्थ्यः ॥१२ ॥

Dr. Rangan

WEBOLIM

**अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यम्।**

**इन्द्र यच्चित्रं श्रवस्या अनु द्यून्बृहद्वदेम विदथे सुवीराः॥ २.०१३.१३**

वसो- चित्तवृत्तिस्तम्भकारक। वसु स्तम्भे। शरण्य। वस निवासे। ते- तव। बहु- प्रभूताम्। वसव्यम्- चित्तवृत्तिस्तम्भकारिणीम्। राधः- संसिद्धिम्। अस्मभ्यम्- नः। दानाय। समर्थयस्व। द्यून्- द्योतनशक्तीः। अनु। इन्द्र- परमेश्वर। चित्रम्- असाधारणीं वाचम्। श्रवस्याः- श्रोतुमिच्छसि। विदथे- यज्ञसभायाम्। सुवीराः- शोभनवीर्यसम्पन्नाः। बृहत्- महत्। वदेम- ब्रवाम ॥१३॥

Dr. Ranganji

WEBOLIM